National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2026; 1(65): 218-221
© 2026 NJHSR
www.sanskritarticle.com

**कौशिक-प्रधानः**
शोधच्छात्रः, व्याकरणविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**कौशिक-प्रधानः**
शोधच्छात्रः, व्याकरणविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# पाणिनीये 'आख्यातोपयोगे' इति सूत्रस्य पदार्थविमर्शः

**कौशिक-प्रधानः**

[इह शोधप्रबन्धे अपादानकारकस्थं आख्यातोपयोगे-सूत्रस्य साङ्गोपाङ्गविवेचनं सूक्ष्मदृष्ट्या कृतम्]

**प्रस्तावना—**

व्याकरणशास्त्रस्य कारकप्रकरणं सर्वापेक्षया दुरूहं महत्त्वपूर्णञ्चास्ति, यतो हि कारकस्य व्याख्याने विचाराणामवकाशाः सन्ति। सूक्ष्मातिसूक्ष्मविचारेषु प्रविष्टे सत्यपि एवम्मन्यते इतोऽपि किञ्चिद्वक्तव्यमस्ति। कारकं यद्यपि व्याकरणशास्त्रस्य विषयः तथापि विषयेऽस्मिन् दार्शनिकानां विशेषतः नैयायिकानां बहवः निबन्धाः सन्ति, येषु सूक्ष्मपर्यालोचनैः जटिलतर्कैश्च विषयोऽमितोऽपि जटिलीक्रियते। भवानन्दसिद्धान्तवागीशस्य *'कारकचक्रम्'*, जगदीशतर्कालङ्कारस्य *'शब्दशक्ति-प्रकाशिका'*, तार्किकशिरोमणेः गदाधरभट्टाचार्यस्य *'व्युत्पत्तिवादश्चे'*त्यादिग्रन्थाः पण्डितसमाजे सर्वेषां परिचिता आदृताश्च। व्याकरणशास्त्रेऽपि दुर्गसिंहस्य *'षट्कारककारिका'*, वोपदेवस्य *'विचारचिन्तामणिः'*, मणिकण्ठस्य *'कारकविचारः'*, चाङ्गुदेवस्य *'चाङ्गुसूत्रम्'*, भरतमल्लिकस्य *'कारकोल्लासः'*, रमाकान्तस्य *'विभक्तितत्त्वार्थवादश्चे'*त्यादयो बहवः ग्रन्थाः विरचिताः सन्ति।

महर्षिपाणिनिना 'कारके' (१.४.२३) इत्यधिकारेण कारक-प्रकरणं प्रारभ्यते, तत्र तेन तद्विषये विशेषतया किमपि नोक्तम्, तथापि तद्रचितेष्वत्यल्पेषु सूत्रेषु यानि गूढतात्पर्याणि सन्ति, तेषामुद्घाटने महर्षिपतञ्जलिना स्वरचिते 'महाभाष्ये' विस्तृततया व्याख्यानं कृतम्। ऋषिकल्पेन भर्तृहरिणापि तदीये *'वाक्यपदीय'*ग्रन्थे कारकसन्दर्भे दार्शनिकशैल्या वर्णनं विहितम्। तद्रचितासु कारिकासु वर्णिताः सिद्धान्ताः, परवर्त्तिनां वैयाकरणानां सविधे उपादेयाः सन्ति। सर्वैः स्वस्वप्रतिपाद्यविषयाणां प्रमाणरूपेण श्रद्धया हरिकारिका उल्लिख्यते। महावैयाकरणस्य शेषकृष्णस्य शिष्येण षोडशशताब्दीयेन भट्टोजिदीक्षितेन *'सिद्धान्तकौमुद्याम्'* संक्षेपेण किञ्च *'शब्दकौस्तुभे'* सविस्तरेण कारकस्य तात्पर्यं विवृतम्। भट्टोजिदीक्षितमनुसृत्य कौण्डभट्टेनापि तदीये *'वैयाकरणभूषणे'* कारकविभक्त्यर्थस्य सौम्येन विवेचनं क्रियते। भट्टोजिदीक्षितपौत्रस्याचार्यस्य हरिदीक्षितस्य शिष्येण सप्तदशशताब्दीयेन दार्शनिकेन महावैयाकरणेन नागेशभट्टेन स्वकीये *'शब्देन्दुशेखर-मञ्जूषा'*दिग्रन्थे कारकस्य विभक्त्यर्थस्य वा सम्बन्धे विशदतयालोचनं कृतम्, अपि च तत्पूर्ववर्त्तिनामाचार्याणामुपपादितमतानां निराकरणं विधाय स्वकीयसिद्धान्ताः प्रतिस्थापिताः।

कारकशब्दः डुकृञ् करणे इति धातोः ण्वुल्प्रत्यये कृते निष्पद्यते। कारकस्य किं लक्षणम् इत्याकाङ्क्षायामुक्तम्— क्रियाजनकत्वमथवा क्रिया निर्वर्तकत्वं कारकत्वम्। कारकस्य लक्षणं महर्षिणा पाणिनिना न निरूपितम्, परं महाभाष्यकारेण पतञ्जलिना कारकस्य लक्षणमित्थं निरूपितम्— ***'कारक इति महती सञ्ज्ञा क्रियते, सञ्ज्ञा च नाम यतो लघीयः, तत्र महत्याः सञ्ज्ञायाः करणे एतत्प्रयोजनमन्वर्थसञ्ज्ञा विज्ञायेत करोतीति कारकम्'*** [1] इति। 'करोत्येतत्' शब्दस्य विशदविवेचनं कुर्वता तेनोक्तम्— साधकं निर्वर्तकं कारकसञ्ज्ञं भवतीति। कारकाध्ययनं विना संस्कृते वाक्यं वक्तुं रचितुं वा नैव शक्यते, ये तु क्रियाकारकसम्बन्धं न जानन्ति ते मन्दबुद्धयो वाक्यार्थमवगन्तुं न पारयन्ति। तदुक्तं मनुदासेन—

**"क्रियाकारकसम्बन्धं ये न जानन्ति मानवाः।**
**पशुभिः सह ते तुल्याः खुरशृङ्गविवर्जिताः॥"[2] इति।**

अतः कारकप्रकरणं यत्नेन भाव्यम्।

**प्रमुखाः विन्दवः—**

अपादानम्, निर्दिष्टविषयम्, उपात्तविषयम्, अपेक्षितक्रियम्, आख्यातृपदार्थः, उपयोगपदार्थश्चेत्यादयः।

**अपादानम्—**

अपगमाय आदीयतेऽवधित्वेनेति अपादानम्। अप-आङ्-पूर्वकाद् दाधातोः ल्युटि कृतेऽपादानशब्दो निष्पद्यते। यस्माद्वस्तुनो वस्त्वन्त-रस्य प्रश्लेषपूर्वको विश्लेषो भवति तद् अपादनमिति। आचार्यो भर्तृहरिः अपादानस्य त्रिविधतां प्रदर्शयामास—

**"निर्दिष्टविषयं किञ्चिदुपात्तविषयं तथा।**
**अपेक्षितक्रियं चेति त्रिधापादानमुच्यते॥"[3]** इति।

एतत्त्रितयं सोदाहरणमिह समासेनोपस्थाप्यते।

**१.निर्दिष्टविषयम्—** यत्र साक्षाद् धातुना विश्लेषः (अपायः) निर्दिश्यते तत् निर्दिष्टविषयम्। निर्दिष्टः= साक्षाद् धातुना बोधितः, विषयः= निरूपकः अर्थः यस्य तदित्यर्थः। यथा, देवदत्तः अश्वात् पततीत्यत्र पत्-धातुना साक्षादपायो निर्दिश्यते, अश्वावधिकपतनाश्रयो देवदत्त इति बोधः।

**२. उपात्तविषयम्—** धातुना धात्वन्तरार्थगर्भितः विषयः= अर्थः यस्य तदुपात्तविषयम्। धात्वन्तरस्य अर्थः अङ्गम्= विशेषणं यस्य तत्। अथवा धात्वन्तरार्थे अङ्गम्= गुणभूतम्, तादृशं स्वार्थं यत्र धातुराह तदुपात्तविषयमपादानम्। यथा, बलाहाकाद् विद्योतते विद्युत्। अत्र निस्सरणाङ्गे विद्योतने द्युत्धातुः प्रयुक्तः।

**३.अपेक्षितक्रियम्—** क्रिया यस्य अपेक्षिता धातोरनुपादानेन आकाङ्क्षिता= गम्यमाना तत् अपेक्षितक्रियम्। यथा, कुतो भवान्? प्रत्यक्षसिद्धमागमनं मनसि निधाय कुतो भवानिति प्रश्नः। पाटलिपुत्रादित्युत्तरम्। कुतो भवानागतः? इति प्रश्नवाक्यार्थः। अहं पाटलीपुत्रादागतः इति समाधानवाक्यार्थः। कुतो भवानागतः? इति क्रियागर्भिते प्रश्ने समाधिरुक्तम्— 'अहं पाटलिपुत्रादागतः' इति क्रियागर्भितमुत्तरम्। अत्र प्रश्ने समाधाने च क्रियावाचकः शब्दः नैवोपात्तः, तथापि वाक्यैकदेशन्यायेनात्र बोधो भवति। एवञ्च वाक्यशक्तिमहिम्ना लब्धां क्रियामादाय अपादानं स्वीक्रियते मञ्जूषायां नागेशेन।

**आख्यातोपयोगे इति सूत्रावतरणम्—**

पाणिनिना अष्टाध्याय्यां कारकाधिकारेऽष्टाभिः सूत्रैरपादानसंज्ञा विधीयते, तेषु सूत्रेषु षष्ठं सूत्रं भवति 'आख्यातोपयोगे' (१.४.२९) इति। द्विपदमिदं सूत्रम्- आख्याता उपयोगे इति। अत्र 'कारके' (१.४.२३) इत्यधिक्रियते। 'ध्रुवमपायेऽपादानम्' (१.४.२४) इति पूर्वसूत्राद् अपादानमिति पदमनुवर्तते। उपयोगे आख्याता कारकम् अपादानम् इत्यन्वयः। इह सूत्रे अपादानमिति विधेयपदमवशिष्ट-सूत्रमुद्देश्यांशः। उपयोगे (नियमपूर्वकविद्यास्वीकारे) सति आख्याता (वक्ता/पाठयिता) अपादानसंज्ञको भवतीति सूत्रार्थः। अपादानत्वात् तद्वाचकाच्छब्दात् पञ्चमी विभक्तिर्भवति 'अपादाने पञ्चमी' (२.३.२८) इति सूत्रेण। यथा— शिष्यः उपाध्यायाद् अधीते। काशिका-कौमुद्यादिष्वेवमेव प्रतिपादितमस्ति।[4]

**आख्यातृपदार्थः—**

आ समन्तात् ख्यातिः वक्ति इति आख्याता। आङ्-पूर्वकात् चक्षिङ्-धातोः कर्तरि तृचि, चक्षिङः ख्या-देशे च आख्यातृ-शब्दो निष्पद्यते, तस्यैव प्रथमैकवनं भवति आख्याता। शब्दस्यास्यार्थो भवति वक्ता, अध्यापयिता, उपदेष्टा, प्रतिपादयिता, पाठयिता वा। य उपदिशति, अध्यापयति स एव इह आख्यातृपदवाच्यः। उपयोगशब्दानुरोधाद् आख्यातृपदेन आचार्यादीनामाप्तानामेव ग्रहणं, न त्वन्येषाम्।


एतेषाम् आख्यातॄणां प्रकृतसूत्रेण अपादानत्वं विहितम्।

**उपयोगपदार्थः—**

उपयुज्यते फलाय इति उपयोगः। उप-पूर्वकाद् युज्-धातोः घञि कृते उपयोगशब्दो निष्पद्यते। शब्दस्यास्य प्रयोजनादयो नैकेऽर्थाः सन्ति। परन्त्विह उपयोग-शब्दस्य ब्रह्मचर्यादिरूपनियमपूर्वकं विद्याग्रहण-मर्थः। अस्मिन्नेवार्थे शब्दोऽयं (उपयोगः) रूढः। नियमपूर्वकं नाम किम्? नियमः पूर्वो यस्य तत् नियमपूर्वकम्, 'शेषाद्विभाषा' (५.४.१५४) इत्यनेन कप्। नियमशब्दस्य द्विविधः अर्थः शास्त्रकारैः स्वीकृतः। तदुक्तम्— **"वाक्यादीनां ग्रहीतुः प्रवृत्तिर्नियम इत्येके। विद्यादिग्रहणार्थं शिष्यादेर्प्रवृत्तिर्नियम इत्यन्ये।"** इति।

**सूत्रार्थस्योदाहरणवाक्ये समन्वयः—**

शिष्य उपाध्यायाद् अधीते इत्युदाहरणे उपाध्यायो वक्ता। को नाम उपाध्यायः? इति प्रश्ने उच्यते— उपेत्य अस्माद् अधीयत इति उपाध्यायः, उपेत्य नाम समीपं गत्वा अधीयते अस्मादिति विग्रहे उप, अधि इत्युपसर्गद्वयपूर्वकात् इङ् अध्ययने इति धातोः "इङश्च" (३.३.२१) इति सूत्रेण घञ्प्रत्यये प्रत्ययस्य ञित्वमादाय "अचो ञ्णिति" (७.२.११५) इति वृद्धौ, आयादेशे सवर्णदीर्घे च उपाध्याय-शब्दो निष्पद्यते।




उपाध्यायः कस्तद्विषये मनुना कथ्यते— **"एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुनः। योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते॥"[5]** इति। नियमविशेष-पूर्वकम् उपाध्यायस्य उच्चारणं शिष्यः अनूच्चारयति इत्यर्थो भवत्युदाहरणस्य। अत्र शिष्यो नियमपूर्वकं विद्यां स्वीकरोति, विद्यास्वीकारे साध्ये वक्ता उपाध्यायः प्रकृतसूत्रेण अपादानसंज्ञको भवति। अपादानसंज्ञावाचकाद् उपाध्यायशब्दाद् 'अपादाने पञ्चमी'(२.३.२८) इति सूत्रेण पञ्चमी विभक्तिर्भवति। एवमेव 'पण्डितात् पुराणं शृणोति, स गुणिभ्यो गुणान् आप्नोत्' चेत्यादि।

**उपयोगपदप्रयोजनम्—**

उपयोगपदग्रहणाभावे आख्यातृमात्रस्यापादानसंज्ञा प्रसज्येत, उपयोगपदग्रहणेन तथा न भवति। उपयोगे सत्येव आख्यातुरपादानसंज्ञा न त्वनुपयोगे। यदि नियमपूर्वकविद्यास्वीकारे इत्यर्थो नायाति, तर्हि वक्तुः अपादान-संज्ञा न भवति। यथा, श्रोतारो नटस्य गाथां शृण्वन्ति। अत्रो-दाहरणे नियमपूर्वकं शास्त्र-निर्दिष्टं वैधं श्रवणं नास्तीत्यतो नापादानसंज्ञा। किन्तु सम्बन्धे सम्बन्धप्रतियोगिवाचकात् नटशब्दात् षष्ठी भवति न तु पञ्चमी। गाथाकर्मकं नटसम्बन्धि श्रवणमिति बोधः। गाथाश्रवणं नियमं नापेक्षते, तत् नटस्य अपादानता नेह विवक्ष्यते। अत्रावधेयं प्रकृतोदाहरणे श्रवणक्रियां श्रोतारो निर्वर्तन्तेऽतस्तेषामेवेह कारकत्वं न तु नटस्य, परन्तु गाथावाचनरूपक्रियानिर्वर्तने नटस्य कारकत्वमस्त्येव। कारका-धिकारात् व्यापारमात्रे लब्धे सूत्रे उपयोगग्रहणं विशिष्टव्या-पारपरिग्रहणार्थम्। तेन ग्रन्थार्थधारणार्थं यद् ग्रहणं स उपयोगः। एवञ्च नटस्य गाथां श्रृण्वन्तीत्यादौ गाथाश्रवणस्य अतथात्वात् नटस्य नापादानत्वम्। यदा तु नटादिभ्योऽपि तथा नियमपूर्वकः विद्यास्वीकारस्तदा 'नटात् श्रृणोती'ति अपादानत्वं भवत्येव।



श्रोतारः नटः

अत्र शङ्का- यदि उपयेगाभावान्नटस्यापदानताविवक्षिता तर्हि कथं न तत्र 'अकथितञ्च'(१.४.५१) इत्यनेन कर्म्मता प्राप्नोति? अत्र समाधिरुच्यते— दुह्यादि[6] परिगणनेषु शृणोतेर्ग्रहणाभावात् नटस्य कर्म्मत्वं न प्राप्नोति।

**उप्रयुक्तयोरुदाहरणयोः पार्थक्यम्—**

| ☑ शिष्य उपाध्यायाद् अधीते | ☒ श्रोतारो नटस्य गाथां श्रृण्वन्ति |
|---|---|
| ✍ अत्र उपाध्यायः आख्याता। | ✍ अत्र नटः आख्याता। |
| ✍ अत्र उपयोगस्य सन्दर्भः अस्ति। | ✍ अत्र उपयोगस्य सन्दर्भः नास्ति। |
| ✍ इह सन्दर्भे आख्यातुः कारकत्वं भवति। | ✍ इह सन्दर्भे 'आख्यातोपयोगे' इत्यनेन अपादानसंज्ञा न भवति, किञ्च आख्यातुः कारकत्वमपि न भवति। |
| ✍ 'आख्यातोपयोगे' इत्यनेन अपादानसंज्ञा भवति। | |

गदाधरभट्टाचार्यस्य मतेन 'पण्डितात् पुराणं शृणोति, उपाध्यायाद् वेदम् अधीयते, रामादधीतसन्देशः' इत्यादावाख्यातुः 'आख्यातोपयोगे' इत्यनेनापादानता इति। परन्तु गदाधरोक्तेष्वुदाहरणेषु आद्ये तृतीये च नियमपूर्वकं विद्याया ग्रहणं नास्ति, अतः नानेन (आख्यातोपयोगे इत्यनेन) अपादानत्वं, किञ्च 'विभाषा गुणेऽस्त्रियाम्' (२.३.२४) इति सूत्रेण हेत्वर्थे पञ्चमी विभक्तिरित्येवंरूपेण गदाधरमतं निराकृतम्।

**नियमपूर्वकविद्याग्रहणाभावेऽपि वक्तुरपादानत्वम्—**

उपयोगो नाम नियमपूर्वकं विद्याग्रहणमित्यादावेव प्रतिपाद्यते, तस्मिन् साध्ये वक्तुरपादानत्वमुक्तमस्ति। परन्तु केषुचित् स्थलेषु नियमपूर्वकं विद्याग्रहणं नस्ति, तथापि तत्राख्यातुरपादानसंज्ञा प्रकृतसूत्रेण कथं भवति? इति शङ्कायां भाषावृत्तौ पुरुषोत्तमदेव आह— "नियमाद् वाक्यग्रहणेऽपि आख्याता प्रतिपादयिता अपादानं स्यात्" इति। अर्थात् नियमेन वचनग्रहणेनापि आख्यातुः प्रकृतसूत्रेणापादानत्वं भवति। यथा, ***'रामादधीतसंदेशो वायोर्जातिश्च्युतस्मिताम्'***[7] इत्यत्र रामः संदेशं श्रावयति, हनुमान् तत् गृह्णाति। नियमपूर्वकविद्याग्रहणाभावात् संदेशवक्तुः रामस्य नापादानता। परन्तु उपयोग इत्यस्य यदि नियमाद्वाक्यग्रहणमित्यर्थो यदि स्वीक्रियते तर्हि हनुमतः नियमेन वाक्यग्रहणे साध्ये संदेशदातुः रामस्य प्रकृतसूत्रेणापादानता ततः पञ्चमी विभक्तिश्च भवत्येव। टीकाकारस्त्वत्र नियमपूर्वकविद्याग्रहणाद् अपादानत्वमाह। तन्मते सावधानेन संदेशग्रहणकारणात् नियमपूर्वकविद्याग्रहणवत् संदेशग्रहणम्।[8]

एवमेव***'हिताच्च*** *यः संशृणुते स किंप्रभुः'*[9] इत्यत्र हितशब्देन हितकारी बोध्यः। अत्रादौ हितोपदेष्टुः सकाशाद् वाक्यग्रहणमिति सदर्थकेऽन्वयः, तदन्तरं नञर्थकेऽन्वयो भवति। पूर्ववदत्रापि स्वामिनः नियमादुपदेशाश्रवणेऽपि प्रकृतसूत्रेणाख्यातुः हितस्यापादानत्वं सिद्ध्यति। इत्थमन्यत्रापि ज्ञेयम्—'तौ सुकेतुसुतया खिलीकृते **कौशिकाद्विदि**तशापया पथि।'[10],*'ताभ्यस्तथाविधान्स्वप्नाञ्छ्रुत्वा प्रीतो हि पार्थिवः।'*[11], *'इति* ***तेभ्यः*** *स्तुतीः श्रुत्वा यथार्था हृदयंगमाः।'*[12] चेत्यादि।

**भाष्यदिशा सूत्रस्य प्रत्याख्यानम्—**

इदमपि सूत्रं भाष्ये प्रत्याख्यातमस्ति। यथा— अयमपि योगः शक्योऽवक्तुम्। कथमुपाध्यायादधीत इति**?** अपक्रामति तस्मात्तदध्ययनम्। यद्यपक्रामति**,** किं नात्यन्तायापक्रामति**?** सन्ततत्वात्। अथवा ज्योतिर्वज्ज्ञानानि भवन्ति। आशयस्त्वेवम्— अधीयमानवाक्यजातम् अध्ययनमित्युच्यते। एवञ्च अपक्रमजनितविश्लेषाश्रयत्वात् 'ध्रुवमपायेऽपादानम्' इत्यनेन उपाध्यायस्य अपादानत्वं सिद्ध्यति। उपाध्यायादपक्रान्तं शब्दजातमुपादत्ते इत्यर्थः। शब्दस्य व्यञ्जका ध्वनय उपाध्यायेन उत्पद्यमाना भिन्ना अपि सादृश्यात् तत्त्वेन अध्यवसीयमानाः श्रोतुः पुनः पुनः श्रोत्रप्रदेशं गच्छन्तः शब्दमभिव्यञ्जयन्तीत्यर्थः। व्यक्तिस्फोटरूपं जातिस्फोटरूपं वा शब्दमभिव्यञ्जयन्तीत्यर्थः। अथवा यथा ज्वालारूपं ज्योतिः अविच्छेदेन उत्पद्यमानं सादृश्यात् तत्त्वेनाध्यवसीयमानं सन्ततं तथैव उपाध्यायज्ञानानि भिन्नानि भिन्नशब्दरूपतामापद्यमानानि सन्तता-नीत्युच्यन्ते। अत एव कैयटेनोक्तम् **"ज्ञानस्य शब्दरूपतापत्तिरिति दर्शनमत्र भाष्यकारस्य।"**[13] इति।

**उपसंहारः—**

तत्तत्कर्तृसमवेततत्तत्क्रियाजन्यप्रकृतधात्ववाच्यविभागाश्रयत्वमपादानत्वम्। तदेवावधित्वम्। विभागश्च न वास्तवसम्बन्धपूर्वको वास्तव एव, किन्तु बुद्धिपरिकल्पितसम्बन्धपूर्वको बुद्धिपरिकल्पितोऽपि। माथुराः पाटलिपुत्रकेभ्य आढ्यतरा इत्यादौ बुद्धिपरिकल्पितापायाश्रयणेनैव भाष्ये पञ्चमीसाधनात्। पञ्चमीविभक्तेर्नैकेऽर्थाः सन्ति— अवधित्त्वम्, प्रतियोगित्वम्, जन्यत्वम्, स्वकर्तृकोच्चारणाधीनत्वम्, निरूपितत्वम्, ज्ञानज्ञाप्यत्वम्, आरम्भम्, पर्यन्तम्, तदपेक्षात्वञ्चेत्यादयः ङसि-भ्याम्-भ्यस्-लक्षणायाः पञ्चमीविभक्तेरर्थाः। संक्षेपेणोदाहरणं प्रदीयते— अवधित्वम्- "वृक्षात् पर्णं पतति" इति वाक्यात् 'वृक्षावधिकपतनाश्रयं पर्णम्' इति बोधः जायते। प्रतियोगित्वम्- "घटः पटाद् भिन्नः" इति वाक्यात् 'पटप्रतियोगिक-भेदाश्रयो घटः' इति बोधः जायते। जन्यत्वम्- "दण्डाद् घटः" इति वाक्यात् 'दण्डनिरूपितजन्यताश्रयो घटः' इति बोधः जायते। स्वकर्तृकोच्चारणाधीनत्वम्- "पण्डितात् पुराणं शृणोति" इति वाक्यात् 'पण्डितकर्तृकोच्चारणाधीन-श्रावणानुकूलकृतिमान् अयम्' इति बोधः जायते। निरूपितत्वम्- "साध्याभाववतो अवृत्तिः" इति वाक्यात् 'साध्याभाववन्निरूपित-वृत्तित्वाभाववान्' इति बोधः जायते। ज्ञानज्ञाप्यत्वम्- "वह्निमान् धूमात्" इति वाक्यात् 'धूमज्ञानज्ञाप्यवह्निमान्' इति बोधः जायते। आरम्भम्— "आजननाद् अभ्यस्यति" इति वाक्यात् 'जननारम्भकाभ्यासानुकूल-व्यापारानुकूलकृतिमानयम्' इति बोधः जायते। पर्यन्तम्- "आमरणाद् ध्यायति" इति वाक्यात् 'मरणपर्यन्तध्यानवान् अयम्' इति बोधः जायते। तदपेक्षात्वम्- "अयमस्माद् दीर्घः" इति वाक्यात् 'एतदपेक्षादीर्घत्ववान् अयम्' इति बोधः जायते, एवमन्यत्रापीति शम्।

**संदर्भः ग्रन्थः -**

[1] म॰भा॰ (१.४.२३)।

[2] कारकटिप्पण्याम्।

[3] वा॰ प॰ (३.७.१३६)।

[4] नियमपूर्वकविद्यास्वीकारे वक्ता प्राक्संज्ञः स्यात्। उपाध्यायादधीते। (वै॰ सि॰ कौमुद्याम्)। आख्याता प्रतिपादयिता। उपयोगो नियमपूर्वकं विद्याग्रहणम्। उपयोगे साध्ये य आख्याता, तत् कारकमपादानसंज्ञं भवति। उपाध्यायादधीते। उपाध्यायादागमयति। (काशिकायाम्)।

[5]मनुस्मृतौ (२.१४१)।

[6]दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम्। कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम्॥ (पा॰ सू॰ १.४.५१ सूत्रे वै॰ सि॰ कौमुद्याम्)।

[7] भट्टि॰ (८.७२)।

[8]सत्कृत्य अधीतसंदेशो गृहीतसंदेशः कपिकुञ्जरः। आख्यातोपयोगे (१.४.२९) इत्यपादानसंज्ञा। रामस्याख्यातृत्वात्। सावधानतया संदेशग्रहणात् नियमपूर्वकविद्यावत् संदेशग्रहणम्। (भट्टि॰ ८.७२ इत्यत्र जयमङ्गलायाम्)।

[9] किरात॰ (१.५)।

[10] रघु॰ (११.१४)।

[11] तत्रैव (१०.६४)।

[12] कुमार॰ (२.१६)।

[13] महा॰ भा॰ प्रदीपे (१.४.२९)।